13

शुक्लयजुर्वेदीय

13५

अथ

शुक्लयजुर्वेदीयरुद्राष्टा-ध्यायी ।

॥ प्रारम्भः ॥

॥ श्रीगणेशाय नमः ॥ अथ श्रीमद्रुद्राभि-
षेकप्रयोगः ॥ आचम्य प्राणानायम्य शान्ति-
सूक्तं पठित्वा सुमुखश्चेत्यादिगणपतिस्मरणं कृत्वा
संकल्पः-अद्येत्यादि एवंगुणविशेषणविशिष्टायां
शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणो-
क्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्व-
व्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं ॐ भूर्भुवः-
स्वः श्रीभवानीशङ्करमहारुद्रदेवताप्रीत्यर्थं यथा-
ज्ञानेन यथामिलितोपचारद्रव्यैःषडङ्गन्यासपूर्वकं

रु० पुरुषसूक्तेन ध्यानावाहनादिषोडशोपचारैः अन्यो- प्रयो०
।१। पचारैश्च सकृद्रुद्रावर्तनेनाऽभिषेक [रुद्र लघुरुद्र
महारुद्र अतिरुद्र वा] पूर्वकपूजनमहं करिष्ये ॥
षडङ्गन्यासाः—मनोजूतिरिति मन्त्रस्य बृहस्पति-
ऋषिः बृहतीच्छन्दः बृहस्पतिर्देवता हृदयन्यासे
जपे विनियोगः ॥ ॐ मनोजूतिर्जुषतामाज्ज्यस्य
बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञँ समिमन्द-
धातु ॥ विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥
ॐ हृदयाय नमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य ।१।

बुधगविष्ठिरा ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता
शिरोन्यासे जपे विनियोगः ॥ ॐ अबोध्यग्निः
समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ।
यह्वाऽइवप्रवयामुज्जिहानाः प्रभानवः सिस्रते-
नाकमच्छ ॥ ॐ शिरसे स्वाहा ॥२॥ मूर्द्धानमिति
मन्त्रस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्नि-
र्देवता शिखान्यासे जपे विनियोगः ॥ ॐ
मूर्द्धानन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽआ-
जातमग्निम् ॥ कविꣳसम्राजमतिथिञ्जनाना-

९० मासन्नापात्रं जनयन्त देवाः॥ ॐ शिखायै वषट्॥३॥ मयो०
।२। मर्म्माणि त इति मन्त्रस्य अप्रतिरथ ऋषिः विराट्-
छन्दः मर्म्माणि देवता कवचन्यासे जपे विनि-
योगः॥ ॐ मर्म्माणि तेऽवर्म्मणाच्छादयामि सो-
मस्त्वा राजामृतेनानुवस्ताम्। उरोर्वरीयोऽवरुणा-
स्ते कृणोतु जयन्तन्त्वानुदेवा मदन्तु॥ ॐ कवचाय
हुम्॥४॥ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्मा
भौवन ऋषिः त्रिष्टुप्छन्दः विश्वकर्मा देवता
नेत्रन्यासे जपे विनियोगः॥ ॐ विश्वतश्चक्षु- ।२।

रुत व्विश्वतो मुखोव्विश्वतो बाहुरुत व्विश्वः
तस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभू
मी जनयन्देवऽएकः ॥ ॐ नेत्रत्रयायवौषट् ॥५॥
मानस्तोक इति मन्त्रस्य परमेष्ठी ऋषिः जगती
छन्दः एकरुद्रो देवता अस्त्रन्यासे जपे विनि-
योगः ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानो
गोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभा-
मिनोव्वधीर्हविष्मन्तःसदमित्वा हवामहे ॥ ॐ
अस्त्राय फट् ॥ ६ ॥ इति न्यासान्कृत्वा कलश-

ब० १३५
१०.६.६१.

रु० पूजनम्-कलशस्य मुखे विष्णुः० इति कलशमा- पयो०
।३। वाह्य तस्मिन्वरुणावाहनम्-ॐ तत्त्वायामि ब्रह्म-
णा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेहबोध्युरुशꣳस मान आयुः प्र-
मोषीः॥ अस्मिन्कलशे वरुणमावाहयामि॥ क-
लशप्रार्थना-देवदानवसंवादे० इति संप्रार्थ्य ॐ
भूर्भुवःस्वः कलशस्थवरुणाय नमः आवाहयामि
सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि
नमस्करोमि॥ ततः कलशोदकेन पूजाद्रव्याणि ।३।

तथात्मानं च अपवित्रः० इति मन्त्रेण संप्रोक्ष्य
कलशमुद्रां प्रदर्श्य शङ्खपूजनम्-ॐ अग्निर्ऋषिः
पवमानःपाञ्चजन्न्यःपुरोहितः । तमीमहे महा-
गयम् ॥ ॐ भूर्भुवःस्वः शङ्खस्थदेवतायै नमः
आवाहयामि सर्वोपचारार्थे गन्धपुष्पाणि सम-
र्पयामि नमस्करोमि ॥ शङ्खमुद्रां प्रदर्श्य घण्टा-
पूजनम्-ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्तेशिरोग।-
यत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्माछन्दा
ᳪस्यङ्गानि यजूᳪषिनाम । साम ते तनूर्वामदेव्यं

द्ययज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः । सुपर्णो-
सि गरुत्मान्दिवङ्गच्छ स्वः पत ॥ ॐ भूर्भुवः स्वः
घण्टास्थाय गरुडाय नमः आवाहयामि सर्वो-
पचारार्थे गन्धपुष्पाणि समर्पयामि नमस्करोमि ॥
घण्टामुद्रां प्रदर्श्य दीपपूजनम्-ॐ अग्निर्ज्ज्यो-
तिर्ज्ज्योतिरग्निः स्वाहा । सूर्य्यो ज्ज्योतिर्ज्ज्योतिः
सूर्य्यः स्वाहा । अग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः
स्वाहा सूर्य्यो व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा । ज्यो-
तिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा ॥ ॐ भूर्भुवः स्वः

दीपस्थदेवतायै नमः आवाहयामि सर्वोपचा-
रार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि॥
शिवध्यानम्-ॐ नमस्ते रुद्र मन्न्यवऽउतोतऽइषवे
नमः। बाहुब्भ्यामुत ते नमः॥ आवाहनम्-ॐसह-
स्रशीर्षा० ॐ भूर्भुवःस्वः श्रीभवानीशङ्करदेवता-
भ्यो नमः आवाहनं समर्पयामि॥ आसनम्-ॐ
पुरुषऽएवे० ॐ भू० श्री० नमः आसनं सम०॥
पाद्यम्-ॐ एतावानस्य० ॐ भू० श्री० नमः पाद्यं
सम०॥ अर्घ्यम्-त्रिपादूर्ध्व० ॐ भू० श्री नमः

रु० अर्घ्यं सम० ॥ आचमनम्—ॐ ततोऽविराड० प्रयो०
।५। ॐ भू० श्री० नमः आचमनीयं सम० ॥ स्नानम्-
ॐ तस्माद्यज्ञा० ॐ भू० श्री० नमः स्नानं सम०॥
पञ्चामृतस्नानम्-ॐ पञ्चनद्यः सरस्वतीमपिय-
न्तिसस्रोतसः । सरस्वतीतुपञ्चधासोदेशेभवत्स-
रित् ॥ ॐ भू० श्री० नमः पञ्चामृतस्नानं सम०॥
गन्धोदकस्नानम्-ॐ गन्धद्वारां दुराधर्षां नित्य-
पुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोप-
ह्वये श्रियम् ॥ ॐ भू० श्री० नमः गन्धोदकस्नानं ।६।

मम० ॥ उद्वर्तनस्नानम्–ॐ अ॒ꣳशुना॑ते अ॒ꣳशुः
पृ॒च्यता॒म्परु॑षा॒ परुः॑ । ग॒न्धस्ते॒ सोम॑मवतु मदा॑य॒ रसो॒
ऽअच्युतः॑ ॥ ॐ भू० श्री० नमः उद्वर्तनस्नानं
मम० ॥ तदन्ते शुद्धोदकस्नानम् आचमनीयं च
मम० ॥ पञ्चामृतादिस्नानाङ्गपूजा–ॐ भू० श्री०
नमःवस्त्रोपवस्त्रार्थे यज्ञोपवीतार्थे च अक्षतान्
मम०॥गन्धं नानापरिमलसौभाग्यद्रव्याणि ऋतु-
कालोद्भवपुष्पाणि बिल्वपत्राणि च मम० ॥
धूपमाघ्रापयामि ॥ दीपं दर्शयामि ॥ शर्करोप-

हारनैवेद्यं हस्तप्रक्षालनं मुखप्रक्षालनं करोद्वर्त-
।६। नार्थे चन्दनं मुखवासार्थे पूगीफलताम्बूलं हि-
रण्यमुद्रादक्षिणां कर्पूरार्तिक्यं प्रदक्षिणां मन्त्र-
पुष्पयुक्तनमस्कारं विशेषार्घ्यं प्रार्थनां च सम०॥
अर्पणम्-अनेन पञ्चामृतादिस्नानाङ्गपूजनकृ-
तेन श्रीभवानीशङ्करदेवताः प्रीयन्तां न मम ॥
निर्माल्यं विसृज्य पुनश्च गन्धाक्षतपुष्पाणि
समर्प्य रुद्रमन्त्रैः जलधारया अभिषेकः
कार्यः ॥ अभिषेकविचारः-"वेदै[४]र्वेदा[४]ब्धि[४]रामै[३]श्च ।६।

रा[3]मैरा[3]मैर्द्वि[2]कै[1]कैकम् । द्वौ[2] द्वौ[2] पृथग्भिर्मन्त्रैस्तु नम-
काश्चमकाः स्मृताः ॥ वाज[1]श्च सत्य[2]मू[3]र्क्चा[1]श्मा[4]
चा[5]ग्निरं[6]शुष् तथा[7]ग्निकः । एका[8]चैव चतस्र[9]श्च
[10]त्र्यविर्वाजा[11] इति क्रमः ॥" एवं चमकानेकाद-
शधा विभज्य एकैकभागं नमकेषु संयोज्य पठे-
त्स "रुद्रः" ॥ तैरेकादशरुद्रैः "लघुरुद्रः" ॥ तैरेका-
दशगुणैः "महारुद्रः" ॥ तैरेकादशावृत्तैः "अतिरुद्रः" ॥

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ गणानां
न्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपति-

ह० ꣳ. हवामहे निधीनान्त्वा निधिपतिं ꣳ. हवामहे· प्यो०
।७। व्वसो मम ॥ आहमजानि गर्ब्भधमा त्त्वमजासि·
गर्ब्भधम् ॥ १ ॥ गायत्री त्रिष्टुब्जगत्त्यनुष्टुप्प·
ङ्क्त्या सह ॥ बृहत्त्युष्णिहा ककुप्पसूचीभिः शम्म्य·
न्तु त्त्वा ॥ २ ॥ द्विपदाया श्चतुष्पदा स्त्रिपदाया
श्च षट्पदाः ॥ विच्छन्दाया श्च सच्छन्दाः सू·
चीभिः शम्म्यन्तु त्त्वा ॥३॥ सहस्तोमाः सह च्छं·
न्दस ऽआवृतः सहप्प्रमा ऽऋषयः सप्प्त दैव्याः ॥
पूर्व्वेषाम्पन्थामनुदृश्य धीरा ऽअन्न्वालेभिरे रत्थ्यो ।७।

नरश्म्मीन् ॥ ४ ॥ ॐ यज्जाग्ग्रतो दूरमु-
दैति दैवन्तदुसुप्तस्य तथैवैति ॥ दूरङ्गमञ्ज्योति-
षाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ॥ यदपूर्व्वंयक्षमन्तः प्रजानान्तन्मे
मनः शिवसङ्कल्पमस्तु ॥६॥ यत्प्रज्ञानमुतचेतोधृ-
तिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मान्न-
ऋते किञ्चनकर्म्मक्क्रियते तन्मे मनः शिवसङ्क-

रु० ल्पमस्तु ॥७॥ येनेदम्भूतम्भुवनम्भविष्यत्परि- मयो०
।८। गृहीतममृतेन सर्व्वम् ॥ येन यज्ञस्तायते सप्तहो-
ता तन्मे मनः शिवसङ्कल्पमस्तु ॥८॥ यस्मिन्
न्नृचः सामयजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभावि
वाराः । यस्मिँश्चित्तꣳ सर्व्वमोतम्प्रजानान्त-
न्मे मनः शिवसङ्कल्पमस्तु ॥ ९ ॥ सुषारथिर
श्वानिव यन्मनुष्यान्नेनीयते भीशुभिर्व्वाजिन
ऽइव ॥ हृत्प्रतिष्ठं यदजिरं जविष्ठन्तन्मेम ।८।

नः॒ शि॒वसं॑कल्पमस्तु ॥१०॥ इति रुद्रे प्रथमोऽध्यायः ॥ १ ॥

हरिः ॐ ॥ स॒हस्र॑शीर्षा॒ पुरु॑षः सहस्रा॒क्षः स॒हस्र॑पात् ॥ स भूमि॑ꣳ स॒र्वत॑ः स्पृ॒त्वात्य॑तिष्ठद् दशाङ्गुलम् ॥ १ ॥ पुरु॑ष ए॒वेदꣳ सर्वं॒ यद्भू॒तं यच्च॒ भा॒व्य॑म् ॥ उ॒ताम॑त॒त्वस्येशा॑नो॒ यदन्ने॑नाति॒रोह॑ति ॥ २ ॥ ए॒तावा॑नस्य महि॒मातो॒ ज्याया॑ꣳश्च॒ पूरु॑षः ॥ पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ त्रि॒पाद॑-

६० स्यामृतं दिवि ॥३॥ त्रिपादूर्ध्व उदैत् पुरुषः पादो- अ०२
।९। स्येहाभवत् पुनः ॥ ततो विष्वङ् व्यक्रामत् सा-
शनानशने अभि ॥ ४ ॥ ततो विराडजायत वि-
राजो अधि पूरुषः ॥ स जातो अत्यरिच्यत प-
श्चाद्भूमिमथो पुरः ॥५॥ तस्माद् यज्ञात् सर्वहु-
तः सम्भृतं पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वाय-
व्यानारण्या ग्राम्याश्च ये ॥ ६ ॥ तस्माद्य-
ज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ॥ छन्दाँ-
सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ ।९।

तस्मादश्वा अजायन्त ये के चोभयादतः । गा-
वो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन
देवा अयजन्त साध्या ऋषयश्च ये ॥९॥ यत्पुरुषं
व्यदधुः कतिध व्यकल्पयन् । मुखं किमस्यासीत्
किं बाहू किमूरू पादा उच्येते ॥१०॥ ब्राह्मणो-
ऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू
तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ॥

ऋ० श्रोत्राद् वायुश्चं प्राणश्च मुखांदग्निरंजायत अ०२
१०। ॥१२॥ नाभ्यांआसीदन्तरिक्षं॑ शीर्ष्णो द्यौः स-
मंवर्त्तत॥पद्भ्यां भूमिर्दिशः श्रोत्रात्तथां लोकाँ २ऽ
अंकल्पयन्॥१३॥यत् पुरुषेण हविषां देवा यज्ञ-
मतन्वत ॥ वसन्तोऽस्यासीदाज्यं ग्रीष्म इ
ध्मः शरद्धविः ॥ १४ ॥ सप्तास्यांसन् परिध-
यस्त्रिः सप्त संमिधः कृताः ॥ देवा यद्यज्ञं तं-
न्वाना अबध्नन् पुरुषं पशुम् ॥१५॥ यज्ञेन यज्ञ- ।१०।

मयजन्त देवास्तानि धर्माणि प्रथमान्यासन्॥
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः
सन्ति देवाः ॥१६॥ अद्भ्यः सम्भृतः पृथिव्यै र-
साच्च विश्वकर्मणः समवर्त्तताग्रे ॥ तस्य
त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजान-
मग्रे ॥ १७ ॥ वेदाहमेतं पुरुषं महान्तमादि-
त्यवर्णं तमसः परस्तात् ॥ तमेव विदित्वा-
ति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥१८॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि

रु० जायते ॥ तस्य योनिं परिपश्यन्ति धीरास्त- अ०२
।१२। स्मिन् ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥
यो देवेभ्य आतपति यो देवानां पुरोहितः ॥ पूर्वो
यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ॥
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे ॥ २१ ॥ ।१२।
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्ष-
त्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुं

मइषाणा सर्वलोकं मं इषाणा ॥ २२ ॥ इति
रुद्रे द्वितीयोऽध्यायः ॥ २ ॥

हरिः ॐ ॥ आशुः शिशानो वृषभो
न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥
सङ्क्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अज-
यत् साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमि
षेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना॥
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृ
ष्णा ॥ २ ॥ स इषुहस्तैः सनिषङ्गिभिर्वशी स

ऋ० ८ संस्रष्टा स युध इन्द्रो गणेन ॥ संसृष्टजित् सो- अ० ३
१२। मपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ ३ ॥
बृहस्पते परि दीया रथेन रक्षोहामित्राँ-
नपबाधमानः ॥ प्रभञ्जन सेनाः प्रमृणो युधा
जयन्नस्माकमेध्यविता रथानाम् ॥ ४ ॥ बल-
विज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान
उग्रः ॥ अभिवीरो अभिसत्वा सहोजा जैत्रमि-
न्द्र रथमा तिष्ठ गोवित् ॥५॥ गोत्रभिदं गोविदं व-
ज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ॥ इमं, ।१२।

सं जाता अनुवीरयध्वमिन्द्रं॑. सखायो अनुसंरं॑-
भध्वम् ॥ ६ ॥ अभि गोत्राणि सहसा गाहमानोऽद॒-
यो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडं॑-
युध्योऽस्माकं॑. सेना अवतु प्रयुत्सु ॥ ७ ॥ इन्द्र
आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरएतु सोमः ॥
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो य-
न्त्वग्रम् ॥ ८ ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ
आदित्यानां मरुताꣳ शर्द्ध उग्रम् । महामनसां
भुवनच्यवानां घोषो देवानां जयतामुदस्थात्

॥ ९ ॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मा
मकानां मनांᳫसि ॥ उद्वृत्रहन् वाजिनां वाजि-
नान्युद्रथानां जयतां यन्तु घोषाः ॥ १० ॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या
इषवस्ता जयन्तु॥अस्माकं वीरा उत्तरे भवन्त्वस्माँ
२॥ उ देवा अवता हवेषु ॥ ११॥ अमीषां चित्तं प्रति-
लोभयन्ती गृहाणाङ्गान्यप्वे परे हि ॥ अभिप्रेहि
निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्

॥१२॥ अवसृष्टा परापत शरव्ये ब्रह्मसंशिते। ग-
च्छामित्रान् प्रपद्यस्व मामीषां कंचनोच्छिषः
॥१३॥ प्रेता जयता नर इन्द्रो वः शर्म यच्छतु। उ-
ग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१४॥ असौ
या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्द्ध-
माना। तां गूहत तमसापव्रतेन यथामी अन्यो
अन्यं न जानन् ॥१५॥ यत्र बाणाः सम्पतन्ति
कुमारा विशिखा इव। तन्न इन्द्रो बृहस्पतिरदि-

नं: 134
10.6.61

तिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १६ ॥
मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा रा-
जामृतेनानुवस्ताम् ॥ उरोर्वरीयो वरुणस्ते कृ-
णोतु जयन्तं त्वानु देवा मदन्तु ॥ १७ ॥ इति
रुद्रे तृतीयोऽध्यायः ॥ ३ ॥

हरिः ॐ ॥ विभ्राड् बृहत् पिबतु सोम्यं मध्वा-
युर्दधद् यज्ञपतावविहुतम् ॥ वातजूतो योअभि
रक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥१॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः ॥ दृशे वि-

श्वाय सूर्यम् ॥ २ ॥ येना पावक चक्षसा भुरण्य-
न्तं जनाँ २ ऽ अनु ॥ त्वं वरुण पश्यसि ॥ ३ ॥
दैव्यावध्वर्यू आगतꣳ रथेन सूर्यत्वचा ॥ मध्वा
यज्ञꣳ समञ्जाथे ॥ तं प्रत्नथा । अयं वेनः । चित्रं
देवानाम् ॥ ४ ॥ तं प्रत्नथा पूर्वथा विश्वथेमथा
ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् ॥ प्रतीचीनं
वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे ॥
५ ॥ अयं वेनश्चोदयत् पृश्निगर्भा ज्यो-
तिर्जरायू रजसो विमाने ॥ इममपाꣳ

रु० सङ्गमे सूर्यस्य । शिशुं न विप्रा मतिभी रिहन्ति ॥६॥
।१९। चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणा-
स्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य
आत्मा जगतस्तस्थुषश्च ॥७॥ आ न इडाभि-
र्विदथे सुशस्ति विश्वानरः सविता देव एतु । अपि
यथा युवानो मत्सथा नो विश्वं जगदभिपि-
त्वे मनीषा ॥८॥ यदद्य कच्च वृत्रहन्नुदगा अभि
सूर्य ॥ सर्वं तदिन्द्र ते वशे ॥९॥ तरणिर्विश्व-
दर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रो- ।१९।

चनम् ॥ १० ॥ तत्सूर्यस्य देवत्वं तन्महित्वं
मध्या कर्त्तोर्विततꣳ सञ्जभार ॥ यदेदयुक्त ह-
रितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥११॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते
द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णम-
न्यद्धरितःसंभरन्ति ॥ १२ ॥ बरामहाँ२ऽ अ-
सि सूर्य्य बडादित्य महाँ२ असि ॥ महस्ते सतो म-
हिमा पनस्यतेऽद्धा देव महाँ २ऽअसि ॥१३॥ बट्
सूर्य श्रवसा महाँ२ऽअसि सत्रा देव महाँ२ऽअसि ।

मह्ना देवानामसुर्यः पुरोहितो विभुज्योतिरदा-
भ्यम् ॥ १४ ॥ आयन्त इव सूर्यं विश्वेदिन्द्रस्य
भक्षत ॥ वसूनि जाते जनमान ओजसा प्रति भा-
गं न दीधिम ॥१५॥ अद्या देवा उदिता सूर्यस्य
निरꣳहसः पिपृता निरवद्यात् ॥ तन्नो मित्रो वरुणो
मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१६॥
आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं
च ॥ हिरण्ययेन सविता रथेना देवो याति भुवना-
नि पश्यन् ॥ १७॥ इति रुद्रे चतुर्थोऽध्यायः ॥४॥

हरिः ॐ॥ नमस्ते रुद्र मन्न्यवऽउतो तऽइषवे न-
मः॥ बाहुब्भ्यामुत ते नमः॥१॥ या ते रुद्र शिवा त-
नूरघोरापापकाशिनी॥ तया नस्तन्न्वा शन्तमया
गिरिशन्ताभिचाकशीहि ॥२॥ यामिषुं गिरिशन्त
हस्ते बिभर्ष्यस्तवे ॥ शिवां गिरित्र तां कुरु मा हिं
ꣳसीः पुरुषं जगत् ॥३॥ शिवेन व्वचसा त्वा गिरि
शाच्छा व्वदामसि॥ यथा नः सर्व्वमिज्जगदय-
क्ष्मꣳ सुमनाऽअसत् ॥ ४ ॥ अध्यवोचदधिवक्ता
प्प्रथमो दैव्व्यो भिषक्॥ अहींश्च सर्व्वाञ्जम्भय-

।१७। न्त्सर्व्वाँश्च्चयातुधान्न्योधराचीः परासुव ॥ ५ ॥
असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुः सुमङ्गलः ॥
येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोवैषाꣳ
हेडऽईमहे ॥ ६ ॥ असौयोवसर्प्पतिनीलग्ग्रीवो
विलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नु
दहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनी-
लग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यस-
त्वानोहन्तेब्भ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्न्वं-

नस्त्वमुभयोरात्न्योर्ज्ज्याम् ॥ याश्चचतेहस्तऽ
इषवः परातांभगवोव्वप ॥ ९ ॥ विज्ज्यन्धनुः
कपर्द्दिनोव्विशल्ल्योबाणां वाँ२उत ॥ अनेशन्न-
स्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ याते
हेतिम्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्म्मा-
न्न्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ ११ ॥ परि
तेधन्न्वनोहेतिरस्मान्न्वृणक्तुव्विश्वतः ॥ अथो-
यऽइषुधिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥

श्री राम देव आश्रम

रु० अवतत्यधनुष्ट्वꣳसहस्राक्ष शतेषुधे ॥ निशीर्य्य- अ०५
१२८। शल्यानाम्मुखाशिवोनः सुमनाभव ॥ १३ ॥ नमं-
स्तऽआयुधायानाततायधृष्णवे ॥ उभाब्भ्यां
मुततेनमोबाहुब्भ्यान्तवधन्न्वने ॥ १४ ॥ मानो-
महान्तमुतमानोऽअर्ब्भकम्मान ऽउक्षन्तमुतमा-
नंऽउक्षितम् ॥ मानोव्वधीः पितरम्मोतमातर-
म्मानः प्प्रियास्तन्न्वोरुद्ररीरिषः ॥ १५ ॥ मानं-
स्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वे-
षुरीरिषः । मानोव्वीरान्नुद्रभामिनोव्वधीर्ह- १२८।

विषमन्तः सदमित्वाहवामहे ॥ १६ ॥ नमो-
हिरण्यबाहवे । सेनान्न्येदिशाञ्चपतयेनमो-
नमोव्वृक्षेब्भ्योहरिकेशेब्भ्यः पशूनाम्पतयेन-
मोनमः शष्पिञ्जरायत्विषीमतेपथीनाम्पतये-
नमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेन-
मोनमोबब्भ्लुशाय ॥ १७ ॥ नमोबब्भ्लुशा-
य।व्याधिनेन्नानाम्पतयेनमोनमोभवस्यहेत्यैज-
गताम्पतयेनमोनमोरुद्द्रायाततायिनेक्षेत्राणाम्प-
तयेनमोनमःसूतायाहन्त्यैव्वनानाम्पतयेनमोन-

मोरोहिताय ॥१८॥ नमोरोहिताय। स्थपतयेव्वृ
क्षाणाम्पतयेनमो नमोभुवन्तयेव्वारिवस्कृतायौ-
षधीनाम्पतये नमोनमोमन्त्रिणेव्वाणिजायक-
क्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्क्रन्दयते-
पत्तीनाम्पतयेनमोनमःकृत्स्नायतया॥ १९॥नमःकृ
त्स्नायतया। धावतेसत्त्वनाम्पतयेनमोनमःसहमा-
नायनिव्व्याधिनऽआव्व्याधिनीनाम्पतयेनमो न-
मोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमो नमो
निचेरवेपरिचरायारण्यानाम्पतयेनमोनमोव्वञ्च-

ते ॥२०॥ नमोऽवञ्चते । परिवञ्चते स्तायूनाम्पत-
येनमोनमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये
नमोनमः सृकायिभ्यो जिघांꣳसद्भ्यो मुष्णता-
म्पतयेनमोनमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्ता-
नाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषिणे । गि-
रिचराय कुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्यो ध-
न्वायिभ्यश्च वोनमोनमऽआतन्वानेभ्यः प्र-
तिदधानेभ्यश्च वोनमोनमऽआयच्छद्भ्योऽस्य-
द्भ्यश्च वोनमोनमो विसृजद्भ्यः ॥ २२ ॥ नमो-

रु० व्विसृजद्भ्यो॑ । विद्ध्यं॑द्भ्यश्श्चवो॒नमो॒नम॑ः स्व॒प- अ०९
१२० द्भ्यो॒जाग्र॑द्भ्यश्श्चवो॒नमो॒नम॒ःशया॑नेभ्य॒ऽआसी॑-
नेभ्यश्श्चवो॒नमो॒नम॒स्तिष्ठ॑द्भ्यो॒धाव॑द्भ्यश्श्चवो॒-
नमो॒नम॑ः स॒भाभ्य॑ः ॥ २३ ॥ नम॑ः स॒भा-
भ्य॑ः । स॒भाप॑तिभ्यश्श्चवो॒नमो॒नमो॒ऽश्वे॒भ्यो-
ऽश्वप॑तिभ्यश्श्चवो॒नमो॒नम॑ऽआव्या॒धिनी॑भ्यो-
व्वि॒विद्ध्य॑न्तीभ्यश्श्चवो॒नमो॒नम॒ऽउग॑णाभ्य-
स्तृꣳहतीभ्य॑श्श्चवो॒नमो॒नमो॒ग॒णेभ्य॑ः॥२४॥ न-
मो॒ग॒णेभ्यो॑ । ग॒णप॑तिभ्यश्श्चवो॒नमो॒ नमो॒व्व्रा- १००

तेभ्यो व्रातपतिभ्यश्श्च वो नमो नमो गृत्सेभ्यो-
गृत्सपतिभ्यश्श्च वो नमो नमो विरूपेभ्यो विश्व-
रूपेभ्यश्श्च वो नमो नमः सेनाभ्यः ॥२५॥ नमः
सेनाभ्यः। सेनानिभ्यश्च वो नमो नमो रथिभ्यो
ऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संगृहीतृ-
भ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो-
नमः ॥२६॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो-
नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो नि-
षादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो-

१२.१। मृगयुभ्यश्चवोनमोनमःश्वभ्यः ॥२७॥ नमःश्व- अ. ९
भ्यःश्वपतिभ्यश्चवोनमोनमोभवायंचरुद्द्रायं
चनमःशर्वायंचपशुपतंयेचनमोनीलग्ग्रीवायचशि-
तिकराठांयचनमः कपर्द्दिने ॥२८॥नमः कपर्द्दिने ।
चव्युप्तकेशायचनमः सहस्राक्षायं चशतधंन्व-
नेचनमोगिरिशयायंचाशिपिविष्टायंचनमोमीढुष्टु-
मायचेषुमतेचनमोह्रस्वायं ॥२९॥ नमोह्रस्वा-
यं । चवामनायंचनमोबृहतेचवर्षीयसेचन
मोवृद्धायंचसवृधेचनमोग्ग्रयांयचप्रथमायंचनमः २ १ ।

आशवे ॥ ३० ॥ नमऽआशवे । चाजिरायच-
नमः शीघ्र्यायचशीभ्भ्यायचनमऽऊर्म्म्यायचा-
वस्वन्न्यायचनमोनादेयायचद्वीप्प्यायच ॥ ३१ ॥
नमोज्ज्येष्ठाय । च कनिष्ठायचनमःपूर्व्वजाय
चापरजायचनमोमद्ध्यमायचापगल्भायचनमो
जघन्न्यायचबुद्ध्न्यायचनमः सोभ्भ्याय ॥ ३२ ॥
नमः सोभ्भ्याय । चप्प्रतिसर्य्यायचनमोयाम्म्या
यचक्षेम्म्यायचनमः श्लोक्यायचावसान्न्यायच-
नमऽउर्व्वर्य्यायचखल्ल्यायचनमोवन्न्याय॥३३॥

रु० नमो॒वन्न्या॑य । च॒कक्ष्या॑यच॒नम॑: श्र॒वाय॑चप्र
१२२। ति॒श्र॒वाय॑च॒नम॑ऽआ॒शुषे॑णायचा॒शुर॑थायच॒नम॒: शू-
रा॑यचावभे॒दिने॑च॒नमो॑बि॒ल्मिने॑ ॥ ३४ ॥ नमो॑
बि॒ल्मिने॑ । चकव॒चिने॑च॒नमो॑ऽव॒र्म्मिणे॑च ऽवरू॒-
थिने॑च॒नम॑: श्रु॒ताय॑चश्रुतसे॒नाय॑च॒नमो॑दु॒न्दु॒भ्या॒-
यचाहन॒न्न्या॒यच॒नमो॑धृ॒ष्णवे॑ ॥ ३५ ॥ नमो॑
धृ॒ष्णवे॑ । चप्रमृ॒शाय॑च॒नमो॑निष॒ङ्गिणे॑चेषुधि॒म-
ते॑च॒नम॑स्ती॒क्ष्णेष॑वेचायु॒धिने॑च॒नम॑: स्वायु॒धाय॑च

अ०५

१२२।

सुधन्वने च ॥ ३६ ॥ नमः स्रुत्याय । चपथ्याय
चनमः काट्याय च नीप्याय चनमः कुल्याय
चसरस्याय च नमो नादेयाय चवैशन्ताय च नमः कू-
प्याय ॥ ३७ ॥ नमः कूप्याय । चाव-
ट्याय च नमो वीद्ध्याय चातप्याय च नमो मेघ्याय च
विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो वा
त्याय ॥ ३८ ॥ नमो वात्याय । चरेष्म्याय-
च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय
च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे

।२३। ॥ ३९ ॥ नमः शङ्गवे । चपशुपतयेचनमऽउग्रायं
चभीमायंचनमोऽग्रेवधायंचदूरेवधायंचनमोहन्त्रे अ०५
चहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्यो नमस्ता
राय॥४०॥नमःशम्भवाय।चमयोभवायंचनमःशङ्क
रायंचमयस्करायंच नमः शिवायंच शिवतरायच
॥ ४१ ॥ नमः पार्याय । चावार्यायचनमः प्र-
तरणायचोत्तरणायचनमस्तीर्थ्यायच कूल्यां
यचनमः शष्प्यांयचफेन्यायचनमः सिकत्याय
॥४२॥ नमः सिकत्याय । चप्रवाह्यायचनमः

कि१.शिलायं चक्षयणायंचनमः कपर्द्दिनेचपुल-
स्तयेचनमऽइरिण्यायचप्प्रपत्थ्यायच नमोव्व्रू-
ज्ज्यांय॥४३॥ नमोव्व्रूज्ज्यांय। चगोष्ठ्यांयचनम-
स्तल्प्प्यांयचगेह्यां यचनमोहृदय्यायचानिवेष्प्यां-
यचनमः काट्ट्यांयचगह्वरेष्ठ्ठायंचनमः शुष्क्यांय॥
॥४४॥ नमः शुष्क्यांय।चहरित्यायचनमः पांऽशुस-
व्यायचरजस्यायचनमोलोप्प्यांयचोलप्प्यायच
नमऽऊर्व्यांयचसूर्व्यांयचनमः पर्णायं॥ ४५ ॥
नमः पर्णायं । चपर्णशदायंचनमऽउद्गुरमां-

ग्नायचाभिघ्नतेचनमऽआखिदते चप्रखिदतेच अ०५

रु० नमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः।कि-

।२.४। रिकेभ्योदेवानाꣳहृदयेभ्यो नमोविचिन्व-

त्केभ्योनमोविक्षिणत्केभ्यो नमऽआनिर्हते-

भ्यः ॥ ४६ ॥ द्रापेऽअन्धसस्पते

दरिद्रनीललोहित ॥ आसाम्प्रजानामेषाम्प

शूनाम्माभेर्म्मारोङ्मोचनः किञ्चनाममत ॥

॥ ४७ ॥ इमारुद्राय । तवसेकपर्द्दिनेक्षयद्वीराय ।२४।

प्रभरामहेमतीः॥यथाशमसद्द्विपदेचतुष्पदेविश्व

श्वंम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ या
तें रुद्रशिवातनूःशिवाव्विश्वाहांभेषजी ॥ शिवारु
तस्यंभेषजीतयांनोमृडजीवसें ॥ ४९ ॥ परिंनो
रुद्द्रस्यंहेतिर्व्वृणक्तुपरिंत्वेषस्यंदुर्म्मतिरंघायोः ॥
अवंस्थिरामघवंद्भ्यस्तनुष्ष्वमीढ्वस्तोकायतनंया-
यमृड ॥५०॥ मीढुष्टमशिवंतम । शिवोनःसुमनां-
भव॥परमेव्वृक्षऽआयुंधन्निधायकृत्तिंवसानऽआचं-
रपिनाकम्बिभ्रदागंहि ॥ ५१ ॥ विकिंरिद्द्र-

रु० विलोहित । नमस्तेऽअस्तुभगवः ॥ यास्ते- अ०५
१२५। सहस्रꣳहेतयोन्न्यमस्मन्निवपन्तुताः ॥ ५२ ॥
सहस्राणिसहस्रशोबाह्वोस्तव हेतयः ॥
तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥
असङ्ख्यातासहस्राणि । येरुद्राऽअधिभूम्या-
म् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्म-
सि ॥ ५४ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽ
अधि ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि
॥ ५५ ॥ नीलग्ग्रीवाः शितिकण्ठादिवꣳ १२५।

रुद्द्राऽउपंश्रिताः ॥ तेषांꣳसहस्रयोजनेवध

न्न्वांनितन्न्मसि ॥ ५६ ॥ नीलंग्ग्रीवाःशितिक

ण्ठाःशर्व्वांअधःक्षमाचराः ॥ तेषांꣳसहस्रयोज-

नेवधन्न्वांनितन्न्मसि ॥ ५७ ॥ येव्वृक्षेषुं श-

ष्पिञ्जरानीलंग्ग्रीवाव्विलोंहिताः ॥ तेषांꣳसह-

स्रयोजनेवधन्न्वांनितन्न्मसि ॥ ५८ ॥ येभूता-

नामधिंपतयोव्विशिखासंःकपर्द्दिनंः ॥ तेषांꣳस-

हस्रयोजनेवधन्न्वांनितन्न्मसि ॥ ५९ ॥ ये-

पथाम्पंथिरक्षंयऽऐलबृदाऽआयुर्युधंः । तेषांꣳ

६० सहस्रयोजनेवधन्न्वानितन्न्मासि ॥ ६० ॥ ये- अ०६
।२६। तीर्थानि । प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ ते
षांꣳसहस्रयोजनेवधन्न्वानितन्न्मासि ॥ ६१ ॥
येन्नेषु । व्विविद्ध्यन्तिपात्रेषुपिबतोजनान् ॥ तेषां-
ꣳसहस्रयोजनेवधन्न्वानितन्न्मासि ॥ ६२ ॥ य-
ऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्द्राव्वितस्थि
रे ॥ तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मासि ॥
६३ ॥ नमोस्तु । रुद्द्रेभ्योयेदिवियेषांव्वर्षमि
षवः ॥ तेभ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रती ।२६।

चीर्द्दिशोदीचीर्द्दिशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुते-
नोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वेष्टि
तमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तु । रु-
द्द्रेभ्योयेन्तरिक्षेयेषांव्वातऽइषवः ॥ तेभ्यो
दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशो-
र्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तु-
तेयन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः
॥ ६५ ॥ नमोस्तु । रुद्द्रेभ्योयेपृथिव्व्यांये-
षामन्नमिषवः ॥ तेभ्योदशप्प्राचीर्द्दशदक्षिणा-

६० दशंप्प्रतीचीर्द्दिशोदीचीर्द्दिशोर्द्ध्वाः ॥ तेब्भ्योनमो- ३०६
।२७। ऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्च्च-
नोद्द्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इति रुद्द्रे
पञ्चमोऽध्यायः ॥ ५ ॥

हरिः ॐ ॥ व्वयꣳसोमव्व्रतेतवमनस्तनूषुविब्भ्र
तः ॥ प्रजावन्तःसचेमहि ॥ १ ॥ एषते । रुद्द्रभा
गःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्द्रभा-
गऽआखुस्तेपशुः ॥ २ ॥ अवरुद्द्रमदीमह्यव- ।२७।

देवं त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात् ॥ ३ ॥ भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यम्बकंयजामहे । सुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकय्यँजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्ते । रुद्रावसन्तेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकावसः कृत्ति-

वासाऽअहिꣳसन्नः शिवोतीहि ॥६॥ त्र्यायुषञ्ज-
१२८। मदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषन्त-
न्नोऽअस्तु त्र्यायुषम् ॥ ७ ॥ शिवोनामासि-
स्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ नि-
वर्त्तयाम्म्यायुषेन्नाद्यायप्रजननायरायस्पोषाय-
सुप्रजास्त्वायसुवीर्य्याय ॥ ८ ॥ इतिरुद्रे षष्ठोऽ-
ध्यायः ॥ ६ ॥

हरिः ॐ ॥ उग्रश्च । भीमश्चध्वान्तश्चधुनिश्च ॥ १२८।

मासह्वाँश्चाभियुग्वाचविक्षिपःस्वाहा॥१॥अग्नि-
ꣳ हृदयेनाशनिꣳ हृदयाग्रेणपशुपतिङ्कृत्स्नहृद-
येनभवंय्यक्ना ॥ शर्वम्मतस्नाभ्यामीशानम्म-
न्युनामहादेवमन्तः पर्शव्येनोग्रन्देवंव्वनि-
ष्ठुनाव्वसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ २ ॥
उग्रँल्लोहितेन । मित्रꣳसौव्रत्येनरुद्रन्दौर्व्रत्ये-
नेन्द्रम्प्रक्रीडेनमरुतोबलेनसाद्ध्यान्प्रमुदा ॥ भव
स्यकण्ठ्यꣳरुद्रस्यान्तःपार्श्व्यम्महादेवस्ययकृ-
च्छर्वस्यव्वनिष्ठुःपशुपतेःपुरीतत् ।३। लोमभ्यः

रु० स्वाहा । लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा अ० ७
१२९। लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वा-
हा मेदोभ्यः स्वाहा माꣳसेभ्यः स्वाहा माꣳसेभ्यः
स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थ-
भ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा म-
ज्जभ्यः स्वाहा ॥ रेतसे स्वाहा पायवे स्वाहा ॥ ४॥
आयासाय स्वाहा । प्रायासाय स्वाहा संयासाय-
स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ॥ शुचे-
स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय-

स्वाहा ॥ ५ ॥ तपसे स्वाहा । तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा ॥ निष्कृत्यै स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥ ६ ॥ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ॥ ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा ॥ ७ ॥ इति रुद्रे सप्तमोऽध्यायः । ७ ॥

हरिः ॐ ॥ वाजश्च । मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वर-

श्री राम शैव आश्रम

।३०। श्श्चमेश्लोकश्श्चमेश्श्रवश्श्चमे श्श्रुतिश्श्चमे अ०८
ज्ज्योतिश्श्चमेस्वश्श्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥
प्राणश्श्च । मेपानश्श्चमेव्यानश्श्चमेसुश्श्चमे-
चित्तञ्चमऽआधीतञ्चमेव्वाक्चमेमनश्श्चमेचक्षु-
श्श्चमेश्श्रोत्रञ्चमेदक्षश्श्चमेबलञ्चमेयज्ञेनकल्प-
ताम् ॥ २ ॥ ओजश्श्च । मेसहश्श्चमऽआ-
त्माचमेतनूश्श्चमेशर्मचमेव्वर्मचमेङ्गानिचमे
स्थीनिचमेपरूᳬषिचमेशरीराणिचमऽआयुश्श्च-
मेजराचमेयज्ञेनकल्पन्ताम् ॥३॥ ज्ज्यैष्ठ्यञ्च । ।३०।

मऽआधिपत्यञ्चमे मन्न्युश्श्चमेभामश्श्चमेमश्श्रमे

म्भश्श्चमेजेमाचमे महिमाचमेव्वरिमाचमेप्प्रथि-

माचमेव्वार्षिमाचमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धि-

श्श्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ ॥ सत्त्यञ्च

। मेश्रद्धाचमेजगच्चमेधनञ्चमेव्विश्श्चञ्चमेमहे-

श्श्चमेक्क्रीडाचमेमोदश्श्चमेजातञ्चमेजनिष्ष्य-

माणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेन कल्पन्ता-

म् ॥५॥ ऋतञ्च । मेमृतञ्चमेयक्ष्मञ्चमेनामय-

।३१।

च्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभ- अ०८
यञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्चमेसुदिनं ञ्च-
मेयज्ञेनकल्पन्ताम् ॥६॥ यन्ताचमे धर्त्ताचमेक्षे-
मश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्च-
मेज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरञ्चमेलयश्च-
मेयज्ञेनं कल्पन्ताम्॥७॥शञ्चमेमयश्चमेप्रिय-
ञ्चमेनुकामश्चमेकामश्चमेसौमनसश्चमेभग
श्चमेद्रविणञ्चमेभद्रञ्चमेश्रेयश्चमेवसीय-

श्चमेयशश्चमेयज्ञेनकल्पन्ताम् ॥ ८ ॥
ऊर्क्च । मे सूनृताचमेपयश्चमेरसश्चमेघृतञ्च-
मेमधुचमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमे-
वृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमेयज्ञेनकल्प-
न्ताम् ॥९॥ रयिश्च । मेरायश्चमेपुष्टञ्चमेपुष्टि
श्चमेविभुचमेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुय
वञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनकल्पन्ता-
म् ॥ १० ॥ वित्तञ्च । मेवेद्यञ्चमेभूतञ्चमे

भविष्यच्चंमेसुगञ्चं मेसुपथ्यञ्चमऽऋद्धञ्चंम-
।३२। ऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसु-
मतिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयं
श्च । मेयवाश्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्च
मेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाका
श्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमेयज्ञे-
नकल्पन्ताम् ॥ १२॥ अश्मांच । मेमृत्तिका-
चमेगिरयश्चमेपर्वताश्चमेसिकताश्चमेवनस्प- ।३२।

तंयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चं
मेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम् ॥१३॥ अ-
ग्निश्चं। मऽआपश्श्चमेवीरुधश्चमऽओषधयश्च
मेकृष्टपच्यश्चंमेकृष्टपच्याश्चंमेग्राम्याश्चं मे-
पशवऽआरण्याश्चंमेवित्तञ्चमेवित्तिश्चमेभू-
तञ्चंमेभूतिश्चमेयज्ञेनकल्पन्ताम्॥१४॥वसुच।
मेवसतिश्चंमेकर्म्मचमेशक्तिश्चमेर्थश्चमऽ
एमश्चमऽइत्याचंमेगतिश्चमेयज्ञेनकल्पन्ता-
म् ॥१५॥ अग्निश्च। मऽइन्द्रश्चमेसोमश्च-

१० मऽइन्द्रश्श्चमेसविताचंमऽइन्द्रंश्श्चमेसरस्वतीचम ३०८
३३। ऽइन्द्रंश्श्चमेपूषाचंमऽइन्द्रंश्श्चमेबृहस्पतिश्श्चमऽ-
इन्द्रंश्श्चमेयज्ञेनंकल्पताम् ॥१६॥ मित्त्रश्श्चं।
मऽइन्द्रंश्श्चमेवरुणश्श्चमऽइन्द्रंश्श्चमेधाताचं-
मऽइन्द्रंश्श्चमेत्वष्टाचमऽइन्द्रंश्श्चमेमरुतंश्श्चमऽ
इन्द्रंश्श्चमेविश्वेचमेदेवाऽइन्द्रंश्श्चमेयज्ञेनंकल्प-
न्ताम् ॥ १७ ॥ पृथिवीचं । मऽइन्द्रंश्श्चमेन्तरि-
क्षञ्चमऽइन्द्रंश्श्चमेद्यौश्श्चमऽइन्द्रंश्श्चमेसमाश्श्चमऽ
इन्द्रंश्श्चमेनक्षत्त्राणिचमऽइन्द्रंश्श्चमेदिशश्श्चमऽ ।३३।

इन्द्रश्चमेयज्ञेनंकल्पन्ताम् ॥ १८ ॥ अ८.शुश्चं।
मेरश्मिमश्श्चमेदांभ्यश्चमोधिपतिश्श्चमऽउपा-
ऽशुश्चंमेन्तर्य्यामश्चंमऽऐन्द्रवायवश्चंमेमैत्रा-
वरुणश्चंमऽआश्विनश्चंमेप्रातिप्रस्थानश्च-
मेशुक्रश्चंमेमन्थीचंमेयज्ञेनंकल्पन्ताम् ॥ १९ ॥
आग्रयणश्चं । मेवैश्वदेवश्चंमेध्रुवश्चंमेवै-
श्वानरश्चंमऽऐन्द्राग्नश्चंमेमहावैश्वदेवश्चं-
मेमरुत्वतीयांश्चमेनिष्कैवल्यश्चमेसावित्र-
श्चंमेसारस्वतश्चंमेपात्क्नीवतश्चंमेहारियो-

६० जनश्चंमेयज्ञेनंकल्पन्ताम् ॥ २० ॥ स्रुचंश्च । अ०८
।३४। मेचमसाश्चंमेवायव्यानिचमेद्रोणकलशश्चं-
मेग्रावाणश्चमेधिषवणेचमेपूतभृच्चंमऽआधव-
नीयश्चमेवेदिश्चमेबर्हिश्चंमेवभृथश्चंमेस्व-
गाकारश्चंमेयज्ञेनंकल्पन्ताम् ॥ २१ ॥ अग्नि-
श्चं । मेघर्मश्चंमेर्कश्चंमेसूर्यश्चमेप्राण-
श्चंमेश्वमेधश्चंमेपृथिवीचमेदितिश्चमेदिति-
श्चमेद्यौश्चंमेङ्गुलयःशक्करयोदिशश्चमेयज्ञे- ।३४।
नंकल्पन्ताम् ॥ २२ ॥ व्रतञ्चं । मऽऋतवश्च-

मेतपश्श्चमेसंवत्सरश्श्चमेहोरात्रेऽऊर्वष्ठीवेबृह-
द्रथन्तरेचमेयज्ञेनकल्पन्ताम् ॥ २३ ॥ एकाच।
मेतिस्रश्श्चमेतिस्रश्श्चमेपञ्चचमेपञ्चचमेसप्तच-
मेसप्तचमेनवचमेनवचमऽएकादशचमऽएकाद-
शचमेत्रयोदशचमेत्रयोदशचमेपञ्चदशचमेप-
ञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशच-
मेनवदशचमऽएकविꣳशतिश्श्चमऽएकविꣳशति-
श्श्चमेत्रयोविꣳशतिश्श्चमेत्रयोविꣳशतिश्श्च-
मेपञ्चविꣳ[1]शतिश्श्चमेपञ्चविꣳशतिश्श्चमेसप्त-

१ इत उत्तरं ह्रस्वात्परानुस्वारस्य ꣳ एतच्चिह्नं बोध्यम्।

१३८। विंᳬ॰ शतिश्चमेस॒प्तविंᳬ॰ शतिश्चमे॒नवविंᳬ॰ श- ३०८
तिश्चच॒मे॒नवविंᳬ॰ शतिश्चच॒म॒ऽएकत्रिंᳬ॰ शच्चच॒म॒ऽ-
एकत्रिंᳬ॰ शच्चच॒मे॒त्रयस्त्रिंᳬ॰ शच्चच॒मे॒य॒ज्ञेनकल्पन्-
न्ताम् ॥ २४ ॥ चत॑स्रश्च । मे॒ष्टौचमे॒ष्टौचमे॒द्वाद-
शचमे॒द्वादशचमे॒षोडशचमे॒षोडशचमेविᳬ॰ श॒ति-
श्चचमेविᳬ॰ श॒तिश्चचमे॒चतुर्विंᳬ॰ शतिश्चचमे॒च-
तुर्विंᳬ॰ शतिश्चचमे॒ष्टाविंᳬ॰ शतिश्चचमे॒ष्टाविंᳬ॰ श-
तिश्चचमे॒द्वात्रिंᳬ॰ शच्चचमे॒द्वात्रिंᳬ॰ शच्चचमे॒षट्त्रिंᳬ॰- ३५।
शच्चचमे॒षट्त्रिंᳬ॰ शच्चचमेचत्वारिᳬ॰ शच्चचमेचत्वा-

रिꣳशच्चमे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२५॥ त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥ पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥ २७ ॥ वाजाय स्वाहा प्रसवाय स्वाहा पि-

जायस्वाहाक्रतवेस्वाहाव्वसवेस्वाहाहर्पतयेस्वा-
।३६। हान्न्हेमुग्गधायस्वाहामुग्गधायव्वैनꣳशिनाय-
स्वाहाव्विनꣳशिनऽआन्त्यायनायस्वाहान्त्या-
यभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतये-
स्वाहाप्प्रजापतयेस्वाहा ॥ इयन्तेराण्मित्रा-
यंयन्तासियमनऽऊर्जेत्वा व्वृष्ट्यैत्वाप्प्रजाना-
न्त्वाधिपत्याय ॥ २८ ॥ आयुर्य्यज्ञेन । कल्प-
ताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्य्यज्ञेनकल्पताꣳ
श्रोत्रंयज्ञेनकल्पताम्वाग्यज्ञेनकल्पताम्मनो ।३६।

यज्ञेनंकल्पतामात्मायज्ञेनंकल्पताम्ब्रह्मायज्ञेनं
कल्पताञ्ज्योतिर्यज्ञेनंकल्पताᳬस्वर्यज्ञेनंक-
ल्पताम्पृष्ठंय्यज्ञेनंकल्पतांयज्ञोयज्ञेनंकल्पताम्
॥ स्तोमंश्श्चयजंश्श्चऽ ऋक्चसामंचबृहच्चंरथ-
न्तरञ्चं । स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेः
प्प्रजाऽअंभूमव्वेट्स्वाहा ॥ २९ ॥ इति रुद्रेऽष्टमो
ध्यायः ॥ ८ ॥

॥हरिः ॐ ॥ ऋचंव्वाचम्प्रपंद्येमनोयजुः प्प्रपंद्ये
सामंप्प्राणम्प्रपंद्येचक्षुःश्श्रोत्रंप्रपंद्ये ॥ व्वागोजंःसहौ-

ज्ञोमयिप्प्राणापानौ ॥ १ ॥ यन्म्मेछिद्द्रञ्चक्षुषोहृ-
शां० दयस्यमनसोऽव्वातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥ अ०९
।३७। शन्नोभवतुभुवनस्ययस्प्पतिः ॥ २ ॥ भूर्भुवः स्वः ।
तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः
प्रचोदयात् ॥ ३ ॥ कयानश्चित्रऽआभुवदूती-
सदावृधः सखा । कयाशचिष्ठयावृता ॥४॥ कस्त्वा
। सत्योमदानाम्मᳫहिष्ठोमत्सदन्धसः ॥ दृढाचि-
दारुजेव्वसु ॥ ५ ॥ अभीषुणः सखीनामविताजरितॄ-
णाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कयात्वन्नऽ ।३७।

ऊत्याभिप्प्रमंन्दसेव्वृषन् ॥ कयांस्तोतृभ्यऽआ-
भंर ॥ ७ ॥ इन्द्रोविश्श्वंस्यराजति ॥ शन्नोंऽअस्तु-
द्विपदेशञ्चतुष्षपदे ॥ ८ ॥ शन्नोंमित्रःशंव्वरुंणः
शन्नोंभवत्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिःशन्नो
व्विष्णुरुरुक्क्रमः॥६॥शन्नोव्वातः। पवतांᳬशन्नं-
स्तपतुसूर्य्यः ॥ शन्नःकनिक्क्रदद्देवःपर्जन्न्योंऽ
अभिवंर्षतु ॥ १० ॥ अहांनिशम्भंवन्तुनःशᳬरा-
त्रीःप्प्रतिंधीयताम् ॥ शन्नंऽइन्द्राग्नीभंवतामवों-
भिःशन्नऽइन्द्राव्वरुंणारातहंव्या ॥ शन्नंऽइन्द्रा-

पूषणात्वाजंसातौशमिन्द्रासोमासुवितायशंय्योः॥
११ ॥ शन्नोदेवीरभिष्टयआपोभवन्तुपीतये ॥
शंय्योरभिस्रवन्तुनः ॥ १२ ॥ स्योनापृथिवि ।
नोभवान्नृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः
॥ १३॥ आपोहि । ष्ठामयोभुवस्तानऽऊर्जेदधातन
॥ महेरणायचक्षसे ॥ १४ ॥ योवःशिवतमोरस-
स्तस्यभाजयतेहनः ॥उशतीरिवमातरः ॥ १५ ॥
तस्म्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आ-
पोजनयथाचनः ॥ १६ ॥ द्यौःशान्तिरन्तरिक्षꣳ

शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः
॥ र्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्मशा-
न्तिः सर्व्वᳪ शान्तिः शान्तिरेवशान्तिः सामाशान्तिरे-
धि ॥ १७॥ दृतेदृᳪ हंमामित्रस्यमाचक्षुषासर्व्वा-
णिभूतानिसमीक्षन्ताम्। मित्रस्याहञ्चक्षुषासर्वा
णिभूतानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे
॥ १८ ॥ दृतेदृᳪ हंमा ज्योक्तेसन्दृशिजीव्यास
ञ्ज्योक्तेसन्दृशिजीव्यासम् ॥१९॥ नमस्तेहरसे-

शो॒चिषे॒नम॑स्तेऽअस्त्व॒र्चिषे॑ ॥ अ॒न्याँस्ते॑ऽअ॒स्मम॑-
त्तपन्तु॒हे॒तय॑ः पा॒व॒कोऽअ॒स्मभ्य॑ः शि॒वोभ॑व ॥
२० ॥नम॑स्ते । अस्तु॒वि॒द्युते॒नम॑स्तेस्तनयि॒त्नवे॑ ॥
नम॑स्तेभगवन्नस्तुयत॒ः स्व॒ः स॒मीह॑से ॥२१॥ यतो॑-
यतः स॒मीह॑से॒ततो॑नो॒ऽअभ॑यङ्कुरु ॥ शन्न॑ः कुरुप्र॒-
जाभ्योभ॑यन्नः प॒शुभ्य॑ः ॥ २२ ॥ सु॒मि॒त्रि॒याऩ॒ऽ
आप॒ऽओष॑धयः सन्तुदु॒र्मि॑त्रि॒यास्तस्मै॑सन्तुयो॒-
स्माद्वेष्टि॒यञ्च॑व॒यन्द्वि॒ष्मम॑ः ॥ २३ ॥ तच्चक्षु॑र्दे॒-

वर्हितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः
शतञ्जीवेमशरदः शतᳫं शृणुयामशरदः शतम्प्र
ब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूय-
श्चशरदः शतात् ॥ २४ ॥ इति रुद्रे शान्त्यध्यायः ॥

अथ रुद्रे स्वस्तिप्रार्थनामन्त्राऽध्यायः—हरिः
ॐ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषावि
श्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्व-
स्तिनोबृहस्पतिर्दधातु ॥१॥ ॐ पयः पृथिव्या-
म्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः । पयः-

स्वतीः प्प्रादिशः सन्तुमह्यम् ॥ २ ॥ ॐ व्विष्ष्णो-
रराटमासिव्विष्णोः श्नप्त्रे स्त्थोव्विष्णोः स्यूरसि
व्विष्ष्णोर्द्ध्रुवोसि॥वैष्ष्णवमसिव्विष्ष्णवेत्वा ॥३॥
ॐ अग्निर्द्देवताव्वातोदेवतासूर्य्योदेवताचन्द्रमा-
देवताव्वसवो देवतारुद्द्रादेवतादित्यादेवतामरुतो
देवताव्विश्श्वेदेवादेवताबृहस्पतिर्द्देवतेन्द्रोदेवता-
व्वरुणोदेवता ॥ ४ ॥ ॐ सद्योजातंप्रपद्यामिसद्यो
जातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्व

मांभवोद्भवायनमः ॥ ५ ॥ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः ॥ ६ ॥ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तु रुद्ररूपेभ्यः ॥ ७ ॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥ ८ ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ ब्रह्माधिपति-

रु० ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥९॥ अ१०
।४१। ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेअस्तु-
मामाहिꣳसीः ॥ निवर्त्तयाम्म्यायुषेन्नाद्यायप्र-
जननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥
१० ॥ ॐ विश्वानिदेवसवितर्दुरितानिपरासुव ॥
यद्भद्रन्तन्नऽ आसुव ॥ ११ ॥ ॐ द्यौः शान्तिर-
न्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरो-
षधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः
शान्तिर्ब्रह्मशान्तिः सर्वꣳ शान्तिः शान्तिरेवशान्तिः ।४१।

सामाशान्तिरधि ॥१२॥ ॐ सर्वेषांवाएषवेदाना-
ꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभि-
षिञ्चति ॥१३॥ इतिस्वस्तिप्रार्थनामन्त्राऽध्यायः ॥
ॐ शान्तिः शान्तिः सुशान्तिर्भवतु सर्वारिष्टशा-
न्तिर्भवतु ॥ श्री राम सेव

ॐ भूर्भुवःस्वः श्रीभवानीशङ्कराभ्यां
नमः अभिषेकस्नानं समर्पयामि ॥ ॐ भूर्भुवः
स्वः श्री भवानी० अभिषेकानन्तरमाचमनीयं०॥
ॐ तस्माद्यज्ञात् सर्वहुत ऋचः० ७ ॐ भूर्भुवः

स्वः श्रीभवानी० वस्त्रं० ॥ ॐ तस्मादश्वा० ८ ॐ
भूर्भुवःस्वः श्रीमच्छङ्कराय नमः यज्ञोपवीतं० ॥
(तदभावे अक्षतान्०) ॥ ॐ तँयज्ञं ब० ९ ॐ
भूर्भुवः स्वः श्री भवानी० विलेपनार्थे चन्दनं० ॥
ॐ अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ ॐ
भूर्भुवःस्वः श्रीभवानी० अलङ्कारार्थे अक्षतान्०॥
ॐ यत्पुरुषं० १० माल्यादीनि सुगन्धीनि माल-
त्यादीनि वै प्रभो । मया हृतानि पूजार्थं गृहाण

परमेश्वर॥ ॐ भूर्भुवःस्वः श्रीभवानी॰ माल्यार्थे
सुगन्धिपुष्पाणि॰॥ ॐ शिवोभवप्रजाभ्यो मानु-
षीभ्यस्त्वमांङ्गिरः माद्द्यावा पृथिवीऽअभिशोची-
र्म्मान्तरिक्षम्मा व्वनस्पतीन्॥ ॐ भूर्भुवःस्वः श्री-
भवानी॰ बिल्वपत्राणि॰॥ ॐ भूर्भुवः स्वः श्री-
भवान्यै नमः सौभाग्यद्रव्यार्थे हरिद्राकुङ्कुमं॰ ॐ
भूर्भुवः स्वः श्री भवानी॰ नानापरिमलद्रव्याणि॰
॥ ॐ ब्राह्मणोऽस्य॰ ११ ॐ भूर्भुवःस्वः श्रीभवा-
नीशङ्करा॰ धूपमाघ्रापयामि॥ ॐ चन्द्रमा मनसो॰

१२ ॐ भूर्भुवः स्वः श्रीभवानी० घृतपूर्णनीरा-
जनदीपं दर्शयामि ॥ ॐ नाभ्या आसी० १३ ॐ
भूर्भुवः स्वः श्रीभवानी० पक्कान्नादिपूर्णमहानै-
वेद्यं० ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहा ॐ
व्यानाय स्वाहा ॐ उदानाय स्वाहा ॐ
समानाय स्वाहा ॐ भूर्भुवः स्वः श्रीभवानी०
नैवेद्यमध्ये पानीयं० ॥ ॐ भूर्भुवः स्वः श्रीभवानी०
उत्तरापोशनं० ॥ ॐ भूर्भुवःस्वः श्रीभवानी०
हस्तप्रक्षालनं० ॥ ॐ भूर्भुवःस्वः श्रीभवानी० मुख-

प्रक्षालनं० ॥ ॐ भूर्भुवः स्वः श्रीभवानी० आचमनीयं० ॥ ॐ गन्धद्वारां० ॐ भूर्भुवः स्वः श्रीभवानी० करोद्वर्तनार्थे चन्दनं० ॥ ॐ यत्पुरुषेण० १४ ॐ भूर्भुवः स्वः श्रीभवानी० मुखवासार्थे फलताम्बूलं० ॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ भूर्भुवःस्वः श्रीभवानी० सुवर्णपुष्पदक्षिणां० ॥ ॐ भूर्भुवः स्वः श्रीभवानी० आर्तिक्यनीराजनदीपं दर्शयामि—जय गङ्गाधर हर। शिव जय

गिरजाधीश ॥ शिव जय० ॥ त्वं मां पालय नित्यं
।४४। कृपया जगदीश ॥ हरहर महादेव ॥ १ ॥ कै-
लासे गिरिशिखरे कल्पद्रुमविपिने ॥ शिवज० ॥
गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने ॥ हरहर
०॥ २ ॥ कोकिल कुञ्जति खेलति हंसा वनल-
लिता ॥ शिवज० ॥ रचयति कलाकलापं नृत्यति
मुदसहिता ॥हरहर० ॥ ३ ॥ तस्मिँल्ललितसुदेशे
शाला मणिरचिता॥शिवज०॥ तन्मध्ये हरिनिकटे
गौरी मुदसहिता ॥ हरहर० ॥ ४ ॥ क्रीडां रचयति ।४४।

भूषां रञ्जितनिजमीशम् ॥ शिवज० ॥ ब्रह्मादिक-
सुरसेवित प्रणमति ते शीर्षम् ॥ हर हर० ॥५॥
विबुधवधूर्बहु नृत्यति हृदये मुदसहिता॥शिवज०॥
किन्नरगानं कुरते सप्तस्वरसहिता ॥ हरहर० ॥६॥
धिन कत थै थै धित कत मृदङ्ग वादयते॥
शिवज० ॥ क्वण क्वण ललिता वेणुर्मधुरं नाद-
यते ॥ हरहर० ॥ ७ ॥ रुणु रुणु चरणे रचयति
नूपुरमुज्ज्वलिता ॥ शिवज० ॥ चक्रावर्ते भ्रमयति
कुरुते तां धिक ताम् ॥ हरहर० ॥ ८ ॥ तां तां लुप

हृ० चुप तालं मधुरं नादयते ॥ शिवज० ॥ अङ्गुष्ठाङ्गु- पू. वि.
१४५। लिनादं लस्यकतां कुरुते ॥ हरहर० ॥ ९ ॥ कर्पू-
रद्युतिगौरं पञ्चाननसहितम् ॥ शिवज० ॥ त्रिन-
यन शशिधर मौले, विषधरकण्ठयुतम् ॥ हर
हर० ॥ १० ॥ सुन्दरजटाकलापं पावकयुतभाल-
म् ॥ शिवज० ॥ डमरुत्रिशूलपिनाकं करधृतनृ-
कपालम् ॥ हरहर० ॥ ११ ॥ शङ्खनिनादं कृत्वा
झल्लरि नादयते ॥ शिवज० ॥ नीराजयते ब्रह्मा
वेदऋचं पठते ॥ हरहर० ॥ १२ ॥ इति मृदुचर- १४५।

णसरोजे हृदि कमले धृत्वा ॥ शिवज० ॥ अव-
लोकयति महेशम् ईशम् अभिनत्वा ॥ हरहर० ॥
१३ ॥ रुण्डरचितउरमाला पन्नगमुपवीतम् ॥
शिवज० ॥ वामविभागे गिरिजारूपम् अतिललि-
तम् ॥ हरहर० ॥ १४ ॥ सकलशरीरे मनसिज-
कृतभस्माभरणम् ॥ शिवज० ॥ इति वृषभध्वज-
रूपं तापत्रयहरणम् ॥ हरहर० ॥ १५ ॥ ध्यानम्
आरतिसमये हृदये इति कृत्वा ॥ शिवज० ॥ रामं
त्रिजटानाथम् ईशम् अभिनत्वा ॥ हरहर० ॥ १६ ॥

संगीतमेवं प्रतिदिनपठनं यः कुरुते॥शिवज०॥शिव-
सायुज्यं गच्छति भक्त्या यःशृणुते॥हरहर०॥१७॥
ॐ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्र-
हारम् । सदा वसन्तं हृदयारविन्दे भवं भवानी-
सहितं नमामि ॥ ॐ भूर्भुवः स्वः श्रीभवानी०
कर्पूरार्तिक्यं दर्शयामि ॥ ॐ सप्तास्यासन्०
१५ ॐ भूर्भुवःस्वः श्रीभवानी० प्रदक्षिणां० ॥
ॐ यज्ञेन०१६ ॐ राजाधिराजाय प्रसह्य साहिने
नमो वयं वैश्रवणाय कुर्महे । स मे कामान् काम-

कामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति ॥ ॐ तत्पुरुषाय विद्महे

महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥
ॐ भूर्भुवःस्वः श्रीभवानी० मन्त्रपुष्पाञ्जलिं० ॥
ॐ भूर्भुवःस्वः श्रीभवानी० साष्टाङ्गनमस्कारान्०॥
ततः शिवपार्षदपूजां पञ्चोपचारैः 'शिवगणेभ्यो नमः' इति मन्त्रेण कृत्वा गन्धपुष्पफलहिरण्यं जलपात्रे गृहीत्वा समर्पयेत्-"रक्ष रक्ष महादेव रक्ष त्रैलोक्यरक्षक॥ भक्तानामभयंकर्ता त्राता भव भवार्णवात्॥ वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥ अनेन सफलार्घ्येण फलदोऽस्तु सदा

मम ॥ ॐ भूर्भुवः स्वः श्रीभवानी० विशेषार्घ्यं० ॥

भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः

कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः ।

ईषत्ताम्रजटाऽग्रपल्लवयुतो न्यस्तो जगन्मण्डपे

शम्भुर्मङ्गलकुम्भतामुपगतो भूयात् सतां श्रेयसे ॥

ॐ भूर्भुवः स्वः श्रीभवानी० प्रार्थनां० ॥ हस्तौ

बध्वा-आवाहनं न जानामि न जानामि तवा-

र्चनम् ॥ पूजां चैव न जानामि क्षमस्व परमे-

श्वर ॥ यदक्षरपरिभ्रष्टं मात्राहीनं च यद् भवेत् ।

तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ इति क्षमाप्य अनेन मयाकृतेन आवाहनादिषोडशोपचारैः कृतपूजनेन (लघु) रुद्राभिषेकाख्येन च कर्मणा ॐ भूर्भुवःस्वः श्रीभवानीशङ्करौ प्रीयेतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ विष्णवे नमः ३ ॥

मैनेजर पं० आत्माराम शर्म्मा द्वारा, जार्ज प्रिंटिंग वर्क्स, काशी में मुद्रित ।

इति

शुक्लयजुर्वेदीयरुद्राष्टा-
ध्यायी ।

॥ समाप्तः ॥

[c]

J